# संस्कृत-वार्ता:

**दिनाङ्क :-14.07.2024**

**प्रात: - 06:55**

**प्रधानमन्त्री – मुम्बई**

प्रधानमन्त्री नरेन्द्रमोदी ह्य: मुम्बय्या: गोरेगांवक्षेत्रस्य इंजीनीयरिंग-सर्विस-कम्पनी इत्यस्मिन् प्रदर्शनीकेन्द्रे चतुश्शतकोट्यधिक-नवविंशतिसहस्ररूप्यकाणां मार्ग-रेल-जलपोतस्थानक-परियोजना: राष्ट्राय समर्पितवान् । असौ मुंबय्या: ब्रांद्रा कुर्ला क्षेत्रे इंडियन पेपर सोसायटी टावर्स इत्यस्य जनसंचार माध्यमस्य उद्घाटनम् अपि विहितवान् । अवसरेऽस्मिन् प्रधानमन्त्री नरेन्द्र मोदी प्रोक्तवान् यत् जनसंचारमाध्यमै: नागरिकाणां हिताय नवीन पदक्षेपान् संवर्धयितुं प्रशासनम् सहयोगं प्रदातव्यम् । पर्यावरण संरक्षाणाय एक पेड़ मॉं के नाम इत्यस्य पदक्षेपस्य उदाहरणं प्रकटयन् प्रधानमन्त्री अवदत् यत् पदक्षेपोयं वैश्विक स्तरे प्रशंसित: । जनसंचार माध्यमा: अमुं पदक्षेपं जनान्दोलने परिवर्तयितुं शक्नुवन्ति । असौ विकसित भारतस्य अग्रिम पंचविंशति: वर्षीयां यात्रायां समाचार-पत्र पत्रिकाणां भूमिका अपि प्रतिपादितवान् । अवसरेस्मिन् महाराष्ट्रस्य राज्यपालः रमेश बैसः मुख्यमंत्री एकनाथ शिंदे, उपमुख्यमंत्री देवेन्द्र फडणवीसः अजीत पवारः आईएनएस अध्यक्षः राकेश शर्मा च उपस्थिताः आसन्।

**विधानसभानिर्वाचनम्**

सप्तराज्यानां त्रयोदश विधानसभासनानाम् उपनिर्वाचनस्य परिणाम: उद्घोषित:। इदानीं यावत् एकादश आसनानां परिणाम: आगत:। कांग्रेस दलेन चत्वारि आसनानि तृणमूल कांग्रेस दलेन त्रीणि आसनानि च विजितानि । पञ्जाबे आम आदमी पार्टीतिदलेन जालन्धर-पश्चिम विधानसभासने विजयोधिगत:। हिमाचलप्रदेशे कांग्रेसदले द्वे आसने भाजपादलेन च एकम् आसनं विजितम्। पश्चिम बङ्गाले तृणमूल कांग्रेसदलेन त्रीणि आसनानि विजितानि।

**गृहमंत्री**

केन्द्रीय-गृहमन्त्रिणा अमितशाहेन ह्य: राजधान्यां नवदिल्ल्यां वाइब्रेंट विलेज कार्यक्रमस्य कार्यान्वयनस्य समीक्षायै उच्चस्तरीयोपवेशनस्य अध्यक्षता कृता। अत्रावसरे गृहमन्त्री अवोचत् यत् प्रधानमन्त्रिण: नरेन्द्रमोदिन: नेतृत्वे प्रशासनं देशस्य सीमवर्ति-ग्रामाणां सर्वांगीण विकासाय प्रतिबद्धम् अस्ति। अमुना स्थानीय-निवासिभ्य: वृते अवसरप्रदानं सीमवर्ति-ग्रामेभ्य: पलायनं वारयितुं च सहभागिता-संवर्धनं सबलं प्रतिपादितम्। गृहमन्त्रिणा उक्तं यत् सीमवर्ति ग्रामान् निकसा नियुक्तै: केन्द्रीय-सशस्त्र आरक्षिबलेन सैन्य बलेन च सहकारि-समीतिनां साहाय्येन स्थानीय कृषि-हस्तशिल्पोत्पादानां च क्रयं विधाय तेभ्य: प्रोत्साहनं प्रदातव्यम्, अपि च उक्तं यत् स्थानीय-निवासिभ्य: अपि सैन्य बलेभ्य: विद्यामानानां स्वास्थ्य वैविध्यानां च लाभ: प्राप्तव्य:। अस्मिन् उपवेशने केन्द्रीयगृह-सचिव: अजय भल्ला मन्त्रालयस्य अन्ये अधिकारिणश्च उपस्थित: आसन्। अवधेयं यत् वाइब्रेंट

विलेज कार्यक्रमस्य अन्तर्गतं अरुणाचल-हिमाचल-सिक्किम-लद्दाख-उत्तराखण्ड-राज्यानां नवदश जनपदानां षड्चत्वारिंशत् प्रखण्डानां चयनित ग्रामणां व्यापक विकासाय केन्द्र प्रायोजिता योजना विद्यते।

**टी-ट्वेंटी/जिम्बाब्वे**

जिम्बाब्वेदेशे प्रचाल्यमाणायां विंशतिः प्रति विंशतिः क्रिकेट क्रीडा स्पर्धायाः चतुर्थे द्वन्द्वे भारतदलेन जिम्बाब्वेदलम् पराजितम्। अस्यां स्पर्धायां जिम्बाब्वे दलम् सप्तक्रीडकानां हानिपुरस्सरं द्विपञ्चाशदधिकैक शतधावनांकाः विनिर्मिताः। प्रत्युत्तरे भारतदलम् षड्पञ्चाशदधिकैकशतधावनांकान् विनिर्मीय अस्यां श्रृंखलायां अग्रेसरत्वं भजते।

**लंदन/विंबलडन**

लंदन देशे ह्यः सञ्जाते विंबलडन टेनिस स्पर्धायाः अन्तिमे द्वन्द्वे चेक गणराज्यस्य क्रीडिका बारबोरा क्रेजिकोवा इटली देशस्य जैस्मपाओलिनीं पराजित्य महिला एकल ट्रॉफी विजिता। अस्यां स्पर्धायां क्रेजिकोवा षड् - द्वे , द्वे - षड्, षड् - चत्वारि इत्यंकान्तरालेन जैस्मापाओलिनीं पराजित्य निज प्रथमं विंबलडन एकल प्रतियोगिता विजिता । अद्य पुरुष एकल वर्गे नोवाक जोकोविचः अन्तिमे द्वन्द्वे कार्लोस अल्काराज़ं सम्मुखीकरिष्यति।

**।।ति वार्ताः।।**